Series : JBB/2

SET – 4

कोड नं.
Code No. **52**

रोल नं.
Roll No.

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

| | नोट | | NOTE |
|---|---|---|---|
| (I) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं । | (I) | Please check that this question paper contains **15** printed pages. |
| (II) | प्रश्न-पत्र में दाहिनें हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें । | (II) | Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate. |
| (III) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं । | (III) | Please check that this question paper contains **18** questions. |
| (IV) | **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।** | (IV) | **Please write down the Serial Number of the question in the answer-book before attempting it.** |
| (V) | इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे । | (V) | 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period. |

# संस्कृतम्
# SANSKRIT

*अवधि : होरात्रयम्* | *पूर्णाङ्काः : 80*

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 80*

*Time allowed : 3 hours* | *Maximum Marks : 80*

| | | | |
|---|---|---|---|
| **खण्ड–क** | : | अपठितांश–अवबोधनम् (अपठितांश–अवबोधन) | **10 अङ्काः** |
| **SECTION–A** | : | Unseen Reading Comprehension | |
| **खण्ड–ख** | : | रचनात्मककार्यम् (रचनात्मक–कार्य) | **15 अङ्काः** |
| **SECTION–B** | : | Writing Skills | |
| **खण्ड–ग** | : | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | **25 अङ्काः** |
| **SECTION–C** | : | Applied Grammar | |
| **खण्ड–घ** | : | पठित–अवबोधनम् (पठित–अवबोधन) | **30 अङ्काः** |
| **SECTION–D** | : | Reading Comprehension | |

*निर्देशाः :*

***Instructions :***

(i) *अस्मिन् प्रश्नपत्रे* ***चत्वारः*** *खण्डाः सन्ति ।*

*इस प्रश्न–पत्र में* ***चार*** *खण्ड हैं ।*

*The question paper has* ***four*** *sections.*

(ii) *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।*

*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे ।*

*The answers to each section must be written at one place.*

(iii) *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।*

*प्रश्न–पत्र के अनुसार प्रश्न–संख्या अवश्य ही लिखनी होगी ।*

*Write the question number according to the question paper.*

(iv) *सर्वेषां प्रश्नानाम् उत्तराणि* ***संस्कृतेन*** *लेखनीयानि ।*

*सभी प्रश्नों के उत्तर* ***संस्कृत*** *में लिखिए ।*

*Answer all the questions in* ***Sanskrit****.*

## खण्डः – क

## SECTION – A

## अपठितांश–अवबोधनम् (अपठितांश–अवबोधन)

**Unseen Reading Comprehension** **10 अङ्काः**

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।

Read the following prose passage and write the answer of the given questions in Sanskrit.

वर्तमानकाले मानवः समस्यावर्ते पतितोऽस्ति । एकत्र देहस्य अनेके रोगाः, अन्यत्र मनसः चिन्ताः । कार्यवैफल्येन नैराश्यम् भवति । जीवनशैल्याः परिवर्तनं विना मार्गान्तरं नास्ति । व्यायामाभावात् शरीरस्य स्थौल्यं वर्धते तारुण्यावस्थायाम् च मुधमेहः जायते । एतदेव व्याधिः उच्यते । आधिव्याधिभ्यां पीडितो मानवः निद्रां न लभते । मानवः अतृप्त्या सदा खिद्यते । अतः यथाशक्ति शारीरिकश्रमः कर्त्तव्यः । यत्र पद्भ्यां गन्तुं शक्यते तत्र वाहनेन न गन्तव्यम् । अलं श्रमचिन्त्या । इदं शरीरं पोषितमपि पालितमपि च शोभते । स्वस्थशरीरेणैव मानवः सोत्साहं गृहस्थजीवनस्य सर्वविधानां समस्यानाम् समाधाने कुशलः भवति । सः आध्यात्मिकज्ञानमपि लभते । उक्तञ्च 'शरीरमाद्यं खलु धर्मसाधनम्' ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्न**द्वयम्**)

एक शब्द में उत्तर दीजिए । (केवल **दो** प्रश्न)

Answer in one word. (Only **two** questions)

(i) कस्य अभावात् शरीरस्य स्थौल्यं वर्धते ?

(ii) मानवः कया सदा खिद्यते ?

(iii) वर्तमानकाले कः समस्यावर्ते पतितोऽस्ति ? **1 × 2 = 2**

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्न**द्वयम्**)

पूर्ण वाक्य में उत्तर दीजिए । (केवल **दो** प्रश्न)

Answer in a complete sentence. (Only **two** questions)

(i) कार्यवैफल्येन किं भवति ?

(ii) स्वस्थशरीरेणैव मानवः कासां समाधाने कुशलः भवति ?

(iii) मानवैः यथाशक्ति कः कर्तव्यः ? **2 × 2 = 4**

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write the appropriate title for this passage in Sanskrit. **1**

(द) यथानिर्देशम् उत्तरत। (केवलं प्रश्न**त्रयम्**)

निर्देशानुसार उत्तर दीजिए। (केवल **तीन** प्रश्न)

Answer according to instructions. (Only **three** questions)

(i) 'खिद्यते' इत्यस्याः क्रियायाः कर्तृपदं किम् ?

(क) सन्तोषः (ख) मानवः (ग) मधुमेहः

(ii) 'पीडितः मानवः' अनयोः पदयोः विशेषणं किम् ?

(क) पीडितः (ख) मानवः (ग) नरः

(iii) 'देहस्य' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

(क) मानवस्य (ख) दुःखस्य (ग) शरीरस्य

(iv) अनुच्छेदे 'अन्तिमम्' पदस्य कः विपर्ययः आगतः ?

(क) अलम् (ख) आद्यम् (ग) इदम् **1 × 3 = 3**

## खण्डः – ख

## SECTION – B

### रचनात्मककार्यम् (रचनात्मक–कार्य)

### Writing Skills **15 अङ्काः**

2. पितरं प्रति लिखितम् अधः पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत।

पिता को लिखे गए निम्नलिखित पत्र को मञ्जूषा में दिए गए शब्दों की सहायता से पूर्णकर पुनः लिखिए।

Complete the following letter written to your father, with the help of word given in the box and rewrite the same. **½ × 10 = 5**

ताराचन्द–छात्रावासः

(i) ________

दिनाङ्कः ________

पूज्याः (ii) ________ !

सादरं प्रणामाः।

अत्र कुशलं तत्रास्तु। इदं विज्ञाय भवान् अतिप्रसन्नः भविष्यति यद् गतदिवसे अन्तर्विद्यालयीयभाषणप्रतिस्पर्धायां मया (iii) ________ स्थानं लब्धम्। क्रीडादिवसे (iv) ________ अहमेव प्रथमः आसम्। अस्मिन् वर्षे वार्षिकोत्सवे अहं नाट्याभिनयं (v) ________। अयं वार्षिकोत्सवः आगामि–सोमवासरे (vi) ________। विद्यालयस्य पक्षतः ह्य एव (vii) ________ प्रेषितम्। अहमपि (viii) ________ सूचयामि, भवान् अवश्यम् आगच्छतु। मम (ix) ________ भविष्यति।

भवतः आज्ञाकारी पुत्रः,

(x) ________ ।

**मञ्जूषा**

| |
|---|
| निमन्त्रणपत्रम्, धावनप्रतियोगितायाम्, पीयूषः, उत्साहवर्धनम्, भवन्तम्, प्रयागराजतः, प्रथमम्, करिष्यामि, पितृमहोदयाः, आयोजयिष्यते। |

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत ।

नीचे दिए गए चित्र को देखकर मञ्जूषा में दिए गए शब्दों की सहायता से **पाँच** संस्कृत वाक्यों में वर्णन कीजिए ।

Describe the following picture in **five** Sanskrit sentences with the help of the words given in the box below. **1 × 5 = 5**



**मञ्जूषा**

| |
|---|
| पति, पत्नी, बालिका, वृक्षाः, बहवः, जनाः, परस्परं, वार्तालापं, कुर्वन्ति, लिखति, पत्राणि, वृद्धजनाः, अपि, सन्ति, स्त्रियः, पुरुषाः । |

**अथवा/OR**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत ।

मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर **पाँच** संस्कृत वाक्यों में एक अनुच्छेद लिखिए ।

Write a paragraph in **five** Sanskrit sentences on the following topic with the help of the words given in the box.

**'पुस्तकमेलकम्'**

**मञ्जूषा**

| |
|---|
| चित्राणि, पुस्तकानि, मित्राणि, लोकार्पणम्, अभवत्, अतीवप्रसन्ना, ध्वनिमुद्रिकाः, संगणकम्, अन्तःप्रवेशः, विविधं साहित्यम्, विभिन्नानि, प्रकोष्ठानि, संस्कृत-पुस्तकानि, जनाः, पश्यन्ति । |

**1 × 5 = 5**

4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत। (केवलं वाक्य**पञ्च**कम्)

निम्नलिखित वाक्यों को संस्कृत भाषा में अनुवाद करके लिखिए। (केवल **पाँच** वाक्य)

Translate into Sanskrit and write the following sentences. (Only **five** sentences) **1 × 5 = 5**

(1) लता नाचती है।

Lata dances.

(2) तुम सब गेंद से खेलते हो।

All of you play by ball.

(3) कल मोहन बाजार जायेगा।

Mohan will go to the market tomorrow.

(4) कल रमेश कहाँ था ?

Where was Ramesh yesterday ?

(5) रमा सीता के साथ पढ़े।

Rama study with Sita.

(6) वृक्ष से पत्ते गिरते हैं।

Leaves fall down from the tree.

(7) क्या मैं पढ़ूँ ?

May I read ?

**खण्डः – ग**

## SECTION – C

**अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)**

**Applied Grammar** **25 अङ्काः**

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत – (केवलं प्रश्न**चतुष्टयम्**)

निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि अथवा सन्धि-विच्छेद करके लिखिए। (केवल **चार** प्रश्न)

Write the underline words of the following sentences after joining or disjoining Sandhi's. (Only **four** questions) **1 × 4 = 4**

(i) हयाः + च वहन्ति बोधिताः।

(ii) श्रेष्ठम् + कर्म एव कर्त्तव्यम्।

(iii) अस्माभिः सत् + मार्गे चलितव्यम्।

(iv) सम्पूर्णभारते एकच्छत्रं राज्यम् अस्ति।

(v) एतयोः + जननी तेनावमानिता।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्न**चतुष्टयम्**)

निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनकर लिखिए। (केवल **चार** प्रश्न)

Choose and write the correct compound or expounded forms of the underlined words in the following sentences. (Only **four** questions) **1 × 4 = 4**

(i) काचिदियम् व्याघ्रमारी।
   (क) व्याघ्राय मारयति इति सा
   (ख) व्याघ्रम् मारयति इति सा
   (ग) व्याघ्रस्य मारयति इति सा

(ii) मुनिः राजानं इष्टम् अनतिक्रम्य अभ्यनन्दत्।
   (क) यथिष्टम् (ख) यथाष्टम् (ग) यथेष्टम्

(iii) रामः लवकुशौ उपवेशयितुम् कथयति।
   (क) लवम् च कुशम् च (ख) लवाय च कुशाय च (ग) लवाः च कुशः च

(iv) गलबद्धश्रृगालकः व्याघ्रः पुनः पलायितः।
   (क) गलबद्धः श्रृगालकः
   (ख) गले बद्धः श्रृगालः यस्य सः
   (ग) श्रृगालस्य गले बद्धः यः सः

(v) क्रोधो हि शत्रुः देहस्य विनाशनाय।
   (क) देहविनाशनाय (ख) देहनाशने (ग) देहोनाशनाय

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्न**चतुष्टयम्**)

निम्नलिखित वाक्यों में रेखांकित पदों में प्रकृति-प्रत्ययों को जोड़कर या पृथक् करके उचित उत्तर विकल्पों से चुनकर लिखिए। (केवल **चार** प्रश्न)

Write the underlined words of the following sentences after joining or disjoining suffixes to roots or words, selecting the correct answer from the options given below. (Only **four** questions) **1 × 4 = 4**

(i) नास्ति मातृसमा प्रिय + टाप्।
   (क) प्रियः (ख) प्रियम् (ग) प्रिया

(ii) यत् मम सत्यप्रिय + तल्।
   (क) सत्यप्रियता (ख) सत्यप्रियम् (ग) सत्यापिता

(iii) व्याघ्रजाद् भयात् बुद्धिमती मुक्ता जाता।

(क) बुद्धि +ङीप् (ख) बुद्धिमत् + टाप् (ग) बुद्धिमत् + ङीप्

(iv) परश्वः वयम् ऐतिहासिकस्थलानि द्रष्टुं गमिष्यामः।

(क) इतिहास + घञ् (ख) इतिहास + ठक् (ग) इतिहास + तल्

(v) अयं सन्दर्भः प्रथमम् अवतीर्णः वसुमतीम्।

(क) वसु+मतुप् (ख) वसु+तल् (ग) वसु+तवत्

8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत –

मञ्जूषा में दिए गए शब्दों की सहायता से वाच्य परिवर्तन करते हुए निम्नलिखित संवाद को पुनः लिखिए।
Re-write the following dialogue changing the voice with the help of words given in the box. **1 × 3 = 3**

शीला – सुधे ! इदानीं भवती किं पठति ?

सुधा – इदानीम् (i) ________ गीतापुस्तकं पठ्यते।

शीला – अहमपि प्रातः गीताम् (ii) ________ ।

सुधा – गीतायां कर्मयोगस्य निरूपणम् अस्ति। एतद्विषये (iii) ________ कथं चिन्त्यते ?

**मञ्जूषा**

| |
|---|
| भवत्या, मया, पठामि |

**अथवा/OR**

अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत। (केवलं **त्रयाणाम्**)

निम्नलिखित वाक्यों में वाच्य-परिवर्तन कीजिए। (केवल **तीन** प्रश्न)

Change the voice in the following sentences. (Only **three** questions) **1 × 3 = 3**

(क) रीना गीतं गायति।

(ख) श्यामः मोहनं पृच्छति।

(ग) भिक्षुकेण धनं याच्यते।

(घ) अहं जलं पिबामि।

(ङ) तेन मृगः हन्यते।

9. अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूरयत । (केवलं प्रश्न **चतुष्टयम्**)
निम्नलिखित दिनचर्या में रिक्त स्थानों की पूर्ति कालबोधक शब्दों से कीजिए । (केवल **चार** प्रश्न)
Re-write the daily routine using words in place of figures. (Only **four** questions) **1 × 4 = 4**
(क) उमा प्रातः 8:30 ________ वादने गृहकार्यं करोति ।
(ख) सुनीलः प्रातः 6:15 ________ वादने जागर्ति ।
(ग) अनिलः सायं 5:00 ________ वादने उद्याने क्रीडति ।
(घ) सा प्रातः 7:30 ________ वादने पूजां करोति ।
(ङ) कमला रात्रौ 9:45 ________ वादने स्वपिति ।

10. अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः उचितैः अव्ययपदैः पूरयत । (केवल प्रश्न**षट्कम्**)
निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए अव्यय पदों के द्वारा कीजिए । (केवल **छः** प्रश्न)
Fill in the blanks in the following sentences with appropriate indeclinable words given in the box. (Only **six** questions) **½ × 6 = 3**
(क) आशीषः ________ अत्र आगमिष्यति ।
(ख) उर्मिला सीता ________ गीतं गायतः ।
(ग) परीक्षकः ________ परीक्षणं कृतवान् ।
(घ) सोहनः त्वया ________ क्रीडितुम् इच्छति ।
(ङ) निरीक्षकः ________ विद्यालयम् आगमिष्यति ?
(च) अहो ! मम सखा ________ आगतः ।
(छ) ________ सर्वत्र वायुः विद्यमानोऽस्ति ।
(ज) ________ भवान् किं खादति ?

**मञ्जूषा**

| यत्र–तत्र, इदानीम्, च, श्वः, ह्यः, अपि, कुतः, सह |
|---|

11. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति । शुद्धं पदं प्रदत्त–विकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्न**त्रयम्**)
निम्नलिखित वाक्यों में रेखाङ्कित पद अशुद्ध है । शुद्ध पद दिये गये विकल्पों से चुनकर लिखिए । (केवल **तीन** प्रश्न)
Underlined words are incorrect in the following sentences. After selecting correct words from the options and write the same. (Only **three** questions) **1 × 3 = 3**
(क) त्वं कदा जन्तुशालां द्रक्ष्यामः ? (पश्यथ/द्रक्ष्यसि/द्रक्ष्यन्ति)
(ख) सुदामा कृष्णस्य मित्रः असीत् । (मित्रे/मित्रम्/मित्राणि)
(ग) कोकिलाः गायति । (गायतः/गायति/गायन्ति)
(घ) भ्रमराः मधुपानम् अकरोत् । (अकुरुताम्/अकुर्वन्/अकरोत्)

## खण्डः – घ

## SECTION – D

## पठित-अवबोधनम् (पठित अवबोधन)

## Reading Comprehension

30 अङ्काः

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।

Read the following prose passage and answer the given questions in Sanskrit.

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् । तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः । तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत् । एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः । परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत् । पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत् । 'निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा', एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्त्तुं कञ्चिद् गृहस्थमुपागतः । करुणापरो गृही तस्मै आश्रयं प्रायच्छत् ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्न**द्वयम्**)

एक शब्द में उत्तर दीजिए । (केवल **दो** प्रश्न)

Answer in one word. (Only **two** questions)

(i) निर्धनजनः कथं वित्तम् उपार्जितवान् ?

(ii) तत्तनयः छात्रावासे निवसन् कस्मिन् संलग्नः समभूत् ?

(iii) पिता कं द्रष्टुं प्रस्थितः ? **½ × 2 = 1**

(ब) पूर्ण वाक्येन उत्तरत । (केवलं प्रश्न**मेकम्**)

पूर्णवाक्य में उत्तर दीजिए । (केवल **एक** प्रश्न)

Answer in a complete sentence. (Only **one** question)

(i) जनः किमर्थं पदातिः प्राचलत् ?

(ii) निशान्धकारे प्रसृते सः किम् अचिन्तयत् ? **1 × 1 = 1**

(स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नत्रयम्)

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल तीन प्रश्न)

Choose and write the appropriate answer from the given options. (Only **three** questions)

(i) 'धनम्' इत्यस्य किं पर्यायपदं पद्यांशे प्रयुक्तम् ?

(क) वित्तम् (ख) परमार्थेन (ग) आश्रयम्

(ii) 'प्रस्थितः' इति पदस्य कर्तृपदं किम् ?

(क) पीडितः (ख) पिता (ग) तनूजः

(iii) 'गृही' इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम्?

(क) करुणापरः (ख) शुभावहा (ग) गृहस्थम्

(iv) 'गृही' इति पदस्य किं क्रियापदं गद्यांशे प्रयुक्तम्?

(क) उपागतः (ख) प्रस्थितः (ग) प्रायच्छत् **1 × 3 = 3**

13. अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

निम्नलिखित पद्य को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।

Read the following poetry passage and answer the given questions in Sanskrit.

निमित्तमुद्दिश्य हि यः प्रकुप्यति,
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषि मनस्तु यस्य वै,
कथं जनस्तं परितोषयिष्यति ।।

(अ) एकपदेन उत्तरत । (केवलं प्रश्न**द्वयम्**)

एक शब्द में उत्तर दीजिए । (केवल **दो** प्रश्न)

Answer in one word. (Only **two** questions)

(i) अत्र किम् अकारणं द्वेषि उक्तम् ?

(ii) किम् उद्दिश्य यः प्रकुप्यति ?

(iii) कस्य अपगमे मनुष्यः प्रसीदति ? **½ × 2 = 1**

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्न**मेकम्**)

पूर्ण वाक्य में उत्तर दीजिए । (केवल **एक** प्रश्न)

Answer in a complete sentence. (Only **one** question)

(i) मनुष्यः कदा ध्रुवं प्रसीदति ?

(ii) कं जनः कथमपि न परितोषयिष्यति ? **1 × 1 = 1**

(स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्न**त्रयम्**)

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल **तीन** प्रश्न)

Choose and write the appropriate answer from the given options. (Only **three** questions)

(i) 'यः' इति कर्तृपदस्य क्रियापदं किम् ?

(क) प्रकुप्यति (ख) प्रसीदति (ग) मनः

(ii) 'अकारणद्वेषिमनः' अनयोः पदयोः किं विशेष्यपदम् ?

(क) अकारणद्वेषि (ख) मनः (ग) ध्रुवम्

(iii) 'मनुष्यः' इत्यस्य पदस्य कः पर्यायः श्लोके प्रयुक्तः ?

(क) कथम् (ख) जनः (ग) तम्

(iv) 'अध्रुवम्' इत्यस्य किं विलोमपदं श्लोके प्रयुक्तम् ?

(क) ध्रुवम् (ख) निमित्तम् (ग) अपगमे **1 × 3 = 3**

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

निम्नलिखित नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।

Read the following drama passage and answer the given questions in Sanskrit.

लवः – भ्रातरावावां सोदर्यौ ।

रामः – समरूपः शरीरसन्निवेशः । वयसस्तु न किञ्चिदन्तरम् ।

लवः – आवां यमलौ ।

रामः – सम्प्रति युज्यते । किं नामधेयम् ?

लवः – आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि (कुशं निर्दिश्य) आर्योऽपि गुरुचरणवन्दनायाम् ........... ।

कुशः – अहमपि कुश इत्यात्मानं श्रावयामि ।

रामः – अहो ! उदात्तरम्यः समुदाचारः । किं नामधेयो भवतोर्गुरुः ।

लवः – ननु भगवान् वाल्मीकिः ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्न**द्वयम्**)

एक शब्द में उत्तर दीजिए । (केवल **दो** प्रश्न)

Answer in one word. (Only **two** questions)

(i) लवं कः पृच्छति यत् किं नामधेयम् ?

(ii) लवकुशयोः गुरुः कः ?

(iii) उदात्तरम्यः कः ? **½ × 2 = 1**

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)

पूर्ण वाक्य में उत्तर दीजिए । (केवल **एक** प्रश्न)

Answer in a complete sentence. (Only **one** question)

(i) कुशः किं कथयति ?

(ii) भ्रातरावावां सोदर्यौ इति श्रुत्वा रामः किं कथयति ? **1 × 1 = 1**

(स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्न**त्रयम्**)

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल **तीन** प्रश्न)

Choose and write the appropriate answer from the given options. (Only **three** questions) **1 × 3 = 3**

(i) नाट्यांशे 'श्रावयामि' इति क्रियायाः कर्तृपदं किम् अस्ति ?

(क) लवः (ख) अहम् (ग) रामः

(ii) 'उदात्तरम्यः समुदाचारः' इत्यत्र विशेष्यपदं किम् ?

(क) उदात्तरम्यः (ख) रम्यः (ग) समुदाचारः

(iii) नाट्यांशे 'विषमरूपः' इत्यस्य किं विलोमपदं प्रयुक्तम्' ?

(क) पटरूपः (ख) समरूपः (ग) विरूपः

(iv) 'सहोदरौ' इत्यस्य पर्यायपदं किं प्रयुक्तम् ?

(क) सोदर्यौ (ख) आवाम् (ग) यमलौ

15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । (केवल प्रश्न**चतुष्टयम्**) ।

रेखाङ्कित पदों के आधार पर प्रश्न निर्माण कीजिए । (केवल **चार** प्रश्न)

Frame the questions on the basis of underlined words. (Only **four** questions) **1 × 4 = 4**

(क) तत्र राजसिंहो नाम <u>राजपुत्रः</u> वसति स्म ।

(ख) <u>आत्महितैषिभिः</u> सर्वदा व्यायामः कर्तव्यः ।

(ग) <u>धेनूनाम्</u> माता सुरभिः आसीत् ।

(घ) आर्यस्य प्रसादेन अखण्डिता मे <u>वणिज्या</u> ।

(ङ) संसारे <u>विद्वांसः</u> ज्ञानचक्षुभिः नेत्रवन्तः कथ्यते ।

16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकयोः अन्वयं पूरयत ।

मञ्जूषा में से समुचित पद चुनकर निम्नलिखित दोनों श्लोकों के अन्वय को पूर्ण कीजिए ।

Complete the prose order of the following two shlokas by choosing the appropriate words given in the box.

I. उदीरितोऽर्थः पशुनापि गृह्यते,
हयाश्च नागाश्च वहन्ति बोधिताः ।
अनुक्तमप्यूहति पण्डितो जनः,
परेङ्गितज्ञानफला हि बुद्धयः ।।

अन्वयः– (i) ________ अपि उदीरितः अर्थः ________ गृह्यते, बोधिताः हयाः च (ii) ________ च (भारम्) वहन्ति । (iii) ________ जनः अनुक्तम् अपि ऊहति । (iv) ________ परेङ्गितज्ञानफलाः हि (भवन्ति) । **½ × 4 = 2**

II. क्रोधो हि शत्रुः प्रथमो नराणां,

देहस्थितो देहविनाशनाय ।

यथास्थितः काष्ठगतो हि वह्निः,

स एव वह्निर्दहते शरीरम् ।।

अन्वयः– क्रोधः हि (i) ________ देहविनाशाय / देहस्थितः (ii) ________ शत्रुः (अस्ति) । यथा (iii) ________ स्थितः हि वह्निः (भवति) सः वह्निः काष्ठम् एव दहते तथा (iv) ________ शरीरम् दहते । **½ × 4 = 2**

**मञ्जूषा**

| प्रथमः, नागाः, बुद्धयः, क्रोधः, पशुना, पण्डितः, नराणां, काष्ठगतः |
|---|

**अथवा/OR**

मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थं रिक्तस्थानि पूरयित्वा पुनः लिखत ।

मञ्जूषा की सहायता से श्लोक के भावार्थ में रिक्त स्थानों की पूर्ति करके पुनः लिखिए।

Rewrite after filling the blanks in the meaning of Shlokas with the help of box.

वाक्पटुधैर्यवान् मन्त्री सभायामप्यकातरः । **1 × 4 = 4**

स केनापि प्रकारेण परैर्न परिभूयते ।।

**भावार्थ :**

यः मन्त्री (i) ________ सम्भाषणे चतुरः, धैर्ययुक्तः, (ii) ________ च भवति, सः मन्त्री (iii) ________ कथमपि (iv) ________ न शक्यते ।

**मञ्जूषा**

| तिरस्कर्तुम्, निर्भीकः, सभायाम्, विरोधिभिः |
|---|

17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत ।

निम्नलिखित कथांश को समुचित क्रम में लिखिए ।

Write in right order of the following parts of story. **½ × 8 = 4**

(i) तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः ।

(ii) चौरः एव उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति ।

(iii) चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत ।

(iv) तस्यामेव रात्रौ कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः ।

(v) विचित्रा दैवगतिः ।

(vi) तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन् ।

(vii) यद्यपि ग्रामस्य आरक्षी एव चौर आसीत् ।

(viii) तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत् ।

18. 'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति, तानि यथा क्रमेण समक्षं लिखत । (केवलं प्रश्न**त्रयम्**)

'क' स्तम्भ में लिखित पदों के पर्याय पद 'ख' स्तम्भ में लिखे गये हैं । उनको यथा क्रम से उनके समक्ष लिखिए । (केवल **तीन** प्रश्न)

Synonyms of the words of column 'Ka' have been given in column 'Kha. Write in order in front of required words. (Only **three** questions) **1 × 3 = 3**

| **(क)** | **(ख)** |
|---|---|
| वह्निः | वेगेन |
| वृक्षः | कुञ्जरः |
| गजः | तरुः |
| जवेन | अग्निः |

**अथवा/OR**

अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थान् चित्वा लिखत । (केवल प्रश्न**त्रयम्**)

निम्नलिखित वाक्यों में रेखाङ्कित पदों के प्रसंगानुसार उचित अर्थ को चुनकर लिखिए । (केवल **तीन** प्रश्न)

Write the appropriate meaning after choosing the underlined words of the following sentences. (Only **three** questions) **1 × 3 = 3**

(i) कश्चिद् धूर्तः शृगालः हसन्नाह ।

(क) विडालः (ख) व्याघ्रः (ग) जम्बुकः

(ii) पिता तनुजस्य रुग्णतामाकर्ण्य व्याकुलो जातः ।

(क) शरीरस्य (ख) पुत्रस्य (ग) गात्रस्य

(iii) अभियुक्तः अतीव कृशकायः ।

(क) दुर्बलः (ख) सबलः (ग) भीमकायः

(iv) तस्य गृहम् राजमार्ग निकषा वर्तते ।

(क) निकटम् (ख) दूरम् (ग) स्पर्शम्

www.cbseboardonline.com